श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## भीष्म स्तुति



निज मति से अति रति कृष्ण स्तुति
सुंदर गति पाकर, भीष्म इति

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम् ।
देवीं(म्) सरस्वतीं(म्) व्यासं(न्) , ततो जयमुदीरयेत् ॥

नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम् ।
प्रणामो दुःखशमनस् , तं(न्) नमामि हरिं(म्) परम् ॥

### श्री गणेशाय नमः

श्रीमद्भागवतमहापुराणम् प्रथमः स्कंध :

अथ नवमोऽध्याय :

### सूत उवाच

इति भीत:(फ्) प्रजाद्रोहात्, सर्वधर्मविवित्सया।
ततो विनशनं(म्) प्रागाद्, यत्र देवव्रतोऽपतत् ॥ 1॥

सर्व+ धर्म+ विवित्सया , देव + व्रतोऽ + पतत्

तदा ते भ्रातर:(स्) सर्वे, सदश्वै:(स्) स्वर्णभूषितै:।
अन्वगच्छन् रथैर्विप्रा, व्यासधौम्यादयस्तथा ॥ 2।।

व्यास+ धौम्या+ दयस्तथा

भगवानपि विप्रर्षे, रथेन सधनञ्जयः।
स तैर्व्यरोचत नृपः(ख्), कुबेर इव गुह्यकैः ॥3॥

तैर् + व्यरोचत

दृष्ट्वा निपतितं(म्) भूमौ, दिवश्च्युतमिवामरम्।
प्रणेमुः(फ्) पाण्डवा भीष्मं(म्), सानुगाः(स्) सह चक्रिणा ॥4॥

दिवश् + च्युत+ मिवामरम्

तत्र ब्रह्मर्षयः(स्) सर्वे, देवर्षयश्च सत्तम।
राजर्षयश्च तत्रासन्, द्रष्टुं(म्) भरतपुङ्गवम् ॥5॥

भरत+ पुङ्गवम्

पर्वतो नारदो धौम्यो, भगवान् बादरायणः।
बृहदश्वो भरद्वाजः(स्), सशिष्यो रेणुकासुतः ॥6॥

बृह+ दश्वो

वसिष्ठ इन्द्रप्रमदस्, त्रितो गृत्समदोऽसितः।
कक्षीवान् गौतमोऽत्रिश्च, कौशिकोऽथ सुदर्शनः ॥7॥

गृत् + समदोऽ+ सितः

अन्ये च मुनयो ब्रह्मन्, ब्रह्मरातादयोऽमलाः।
शिष्यैरुपेता आजग्मुः(ख्), कश्यपाङ्गिरसादयः ॥8॥

ब्रह्म+ राता+ दयोऽ+ मलाः , कश्य+ पाङ्गि+ रसादयः

तान् समेतान् महाभागा- नुपलभ्य वसूत्तमः।
पूजयामास धर्मज्ञो, देशकालविभागवित् ॥9॥

देश+ काल+ विभाग+वित्

कृष्णं(ञ्) च तत्प्रभावज्ञ, आसीनं(ञ्) जगदीश्वरम्।
हृदिस्थं(म्) पूजयामास, माययोपात्तविग्रहम् ॥10॥

माययो+ पात् + तविग्रहम्

पाण्डुपुत्रानुपासीनान्, प्रश्रयप्रेमसङ्गतान्।
अभ्याचष्टानुरागास्रै- रन्धीभूतेन चक्षुषा ॥11॥

पाण्डु+ पुत्रा+ नुपा+ सीनान्, प्रश्रय+ प्रेम+ सङ्गतान्

अभ्या+ चष्टा+ नुरागा+ स्रै

अहो कष्टमहोऽन्याय्यं(म्), यद्यूयं(न्) धर्मनन्दनाः।
जीवितुं(न्) नार्हथ क्लिष्टं(म्), विप्रधर्माच्युताश्रयाः ॥12॥

विप्रधर्मा+ च्युता+ श्रयाः

सं(व्)स्थितेऽतिरथे पाण्डौ, पृथा बालप्रजा वधूः।
युष्मत्कृते बहून् क्लेशान्, प्राप्ता तोकवती मुहुः ॥13॥

सं(व्)स्थितेऽ + तिरथे , युष्मत् + कृते

सर्वं(ङ्) कालकृतं(म्) मन्ये, भवतां(ञ्) च यदप्रियम्।
सपालो यद्वशे लोको, वायोरिव घनावलिः ॥14॥

यत्र धर्मसुतो राजा, गदापाणिर्वृकोदरः।
कृष्णोऽस्त्री गाण्डिवं(ञ्) चापं(म्), सुहृत्कृष्णस्ततो विपत् ॥15॥

गदा+ पाणिर् + वृकोदरः , सुहृत्+ कृष्णस् + ततो

न ह्यस्य कर्हिचिद्राजन्, पुमान् वेद विधित्सितम्।
यद्विजिज्ञासया युक्ता, मुह्यन्ति कवयोऽपि हि ॥16॥

यद्+ विजिज्ञासया

तस्मादिदं(न्) दैवतन्त्रं(म्), व्यवस्य भरतर्षभ।
तस्यानुविहितोऽनाथा, नाथ पाहि प्रजा:(फ्) प्रभो ॥17॥

तस्या + नुविहितोऽ + नाथा

एष वै भगवान् साक्षा- दाद्यो नारायण:(फ्) पुमान्।
मोहयन्मायया लोकं(ङ्), गूढश्चरति वृष्णिषु ॥18॥

मोहयन् + मायया , गूढश् + चरति

अस्यानुभावं(म्) भगवान्, वेद गुह्यतमं(म्) शिव:।
देवर्षिर्नारद:(स्) साक्षाद्- भगवान् कपिलो नृप ॥19॥

अस्या+ नुभावं(म्) , देवर्षिर् + नारद: (स्)

यं (म्) मन्यसे मातुलेयं(म्), प्रियं(म्) मित्रं(म्) सुहृत्तमम्।
अकरो:(स्) सचिवं(न्) दूतं(म्), सौहृदादथ सारथिम् ॥20॥

सुहृत् + तमम् , सौहृदा+ दथ

सर्वात्मन:(स्) समदृशो, ह्यद्वयस्यानहङ्कृते:।
तत्कृतं(म्) मतिवैषम्यं(न्), निरवद्यस्य न क्वचित् ॥21॥

ह्यद् + वयस्या + नहङ्कृते:

तथाप्येकान्तभक्तेषु, पश्य भूपानुकम्पितम्।
यन्मेऽसूं(व्)स्त्यजत:(स्) साक्षात्, कृष्णो दर्शनमागत: ॥22॥

तथाप्ये+ कान्त+ भक्तेषु, भूपानु+ कम्पितम् , यन्मेऽ+ सूं(व्)स् + त्यजत:(स्)

भक्त्याऽऽवेश्य मनो यस्मिन्, वाचा यन्नाम कीर्तयन्।
त्यजन् कलेवरं(म्) योगी, मुच्यते कामकर्मभि: ॥23॥

भक्त्या+ वेश्य

स देवदेवो भगवान् प्रतीक्षतां(ङ्),
कलेवरं (म्) यावदिदं(म्) हिनोम्यहम्।
प्रसन्नहासारुणलोचनोल्लसन्,
मुखाम्बुजो ध्यानपथश्चतुर्भुजः ॥24॥

प्रसन्न + हासा+ रुण+ लोचनोल्लसन् , ध्यान+ पथश् + चतुर्भुजः

सूत उवाच

युधिष्ठिरस्तदाकर्ण्य, शयानं(म्) शरपञ्जरे।
अपृच्छद्विविधान्धर्मा- नृषीणां(ञ्) चानुशृण्वताम् ॥25॥

युधिष्ठिरस् + तदा+ कर्ण्य , अपृच्छद् + विविधान् + धर्मा, चानु+ शृण्वताम्

पुरुषस्वभावविहितान्, यथावर्णं(म्) यथाश्रमम्।
वैराग्यरागोपाधिभ्या- माम्नातोभयलक्षणान् ॥26॥

पुरुष+ स्वभाव+ विहितान्

वैराग्य+ रागो+ पाधिभ्या , माम्नातो+ भय+ लक्षणान्

दानधर्मान् राजधर्मान्, मोक्षधर्मान् विभागशः।
स्त्रीधर्मान् भगवद्धर्मान्, समासव्यासयोगतः ॥27॥

भगवद् + धर्मान्, समा + सव्यास+ योगतः

धर्मार्थकाममोक्षां(व्)श्च, सहोपायान् यथा मुने।
नानाख्यानेतिहासेषु, वर्णयामास तत्त्ववित् ॥28॥

धर्मार्थ+ काम+ मोक्षां(व्)श्च , नानाख्या+ नेति+ हासेषु

धर्मं (म्) प्रवदतस्तस्य, स कालः(फ्) प्रत्युपस्थितः।
यो योगिनश्छन्दमृत्योर्, वाञ्छितस्तूत्तरायणः ॥29॥

प्रवद+ तस्तस्य ,योगिनश्+ छन्द+ मृत्योर्, वाञ्छितस् + तूत्+ तरायणः

तदोपसं(व्)हृत्य गिरः(स्) सहस्रणीर्,
विमुक्तसङ्गं(म्) मन आदिपूरुषे।
कृष्णे लसत्पीतपटे चतुर्भुजे,
पुरः(स्)स्थितेऽमीलितदृग्व्यधारयत् ॥30॥

पुरः+ स्थितेऽ+ मीलि+ तदृग् + व्यधारयत्

विशुद्धया धारणया हताशुभस्-
तदीक्षयैवाशु गतायुधव्यथः।
निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्-
तुष्टाव जन्यं (म्) विसृजञ्जनार्दनम् ॥31॥

तदी+ क्षयै+ वाशु, गता+ युध+ व्यथ :,

निवृत् + तसर्वेन्द्रिय+ वृत्ति+ विभ्रमस्

विसृजञ् + जनार्दनम्

श्रीभीष्म उवाच

इति मतिरुपकल्पिता वितृष्णा
भगवति सात्वतपुङ्गवे विभूम्नि।
स्वसुखमुपगते क्वचिद्विहर्तुं(म्)
प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥32॥

मति+ रुप+ कल्पिता , सात्+ वत+ पुङ्गवे,

स्व+ सुख+ मुपगते, क्वचिद् + विहर्तुं(म्) ,

प्रकृति+ मुपे+ युषि ,यद् + भव+ प्रवाहः

त्रिभुवनकमनं(न्) तमालवर्णं(म्),
रविकरगौरवराम्बरं(न्) दधाने।
वपुरलककुलावृताननाब्जं(म्),
विजयसखे रतिरस्तु मेऽनवद्या ॥33॥

त्रिभुवन+ कमनं(न्) ,रविकर+ गौरव+ राम्बरं(न्) ,वपु+ रलक+ कुला+ वृता+ ननाब्जं(म्)

युधि तुरगरजोविधूम्रविष्वक्-
कचलुलितश्रमवार्यलङ्कृतास्ये।
मम निशितशरैर्विभिद्यमान-
त्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ॥34॥

तुरग +रजो+ विधूम्र+ विष्वक् , कच+ लुलित+ श्रम+ वार्यलङ्+ कृतास्ये ,
निशित+ शरैर् + विभिद्यमान , विलसत् + कवचेऽस्तु

सपदि सखिवचो निशम्य मध्ये,
निजपरयोर्बलयो रथं(न्) निवेश्य।
स्थितवति परसैनिकायुरक्ष्णा,
हृतवति पार्थसखे रतिर्ममास्तु ॥35॥

निज+ परयोर् + बलयो, पर+ सैनिका+ युरक्ष्णा , रतिर् + ममास्तु

व्यवहितपृतनामुखं(न्) निरीक्ष्य,
स्वजनवधाद्विमुखस्य दोषबुद्ध्या।
कुमतिमहरदात्मविद्यया यश्-
चरणरतिः(फ्) परमस्य तस्य मेऽस्तु ॥36॥

व्यवहित+ पृतना+ मुखं(न्) , स्वजन+ वधाद्+ विमुखस्य , कुमति+ महर+ दात्म+ विद्यया

स्वनिगममपहाय मत्प्रतिज्ञा-
मृतमधिकर्तुमवप्लुतो रथस्थ:।
धृतरथचरणोऽभ्ययाच्चलद्गुर्-
हरिरिव हन्तुमिभं(ङ्) गतोत्तरीय: ॥37॥

स्व+ निगम+ मपहाय , मृत+ मधिकर् + तुम + वप्लुतो
धृत+ रथ+ चरणोऽभ्य+ याच् + चलद्गुर्, गतोत् + तरीय:

शितविशिखहतो विशीर्णदं(व्)श:(ह्),
क्षतजपरिप्लुत आततायिनो मे।
प्रसभमभिससार मद्वधार्थं(म्)
स भवतु मे भगवान् गतिर्मुकुन्द: ॥38॥

शित+ विशिख+ हतो, क्षतज+ परिप्लुत, प्रसभम+ भिससार

विजयरथकुटुम्ब आत्ततोत्रे,
धृतहयरश्मिनि तच्छ्रियेक्षणीये।
भगवति रतिरस्तु मे मुमूर्षोर्,
यमिह निरीक्ष्य हता गता:(स्) सरूपम् ॥39॥

आत्+ ततोत्रे , धृत+ हय+ रश्मिनि , तच्छ्रिये+ क्षणीये , मुमूर् + षोर्

ललितगतिविलासवल्गुहास-
प्रणयनिरीक्षणकल्पितोरुमाना:।
कृतमनुकृतवत्य उन्मदान्धा:(फ्),
प्रकृतिमगन् किल यस्य गोपवध्व: ॥40॥

ललित+ गति+ विलास+ वल्गुहास , प्रणय+ निरीक्षण+ कल्पितो+ रुमाना:

मुनिगणनृपवर्यसङ्कुलेऽन्त:(स),
सदसि युधिष्ठिरराजसूय एषाम्।
अर्हणमुपपेद ईक्षणीयो,
मम दृशिगोचर एष आविरात्मा ॥41॥

मुनिगण+ नृपवर्य+ सङ्कुलेऽन्त:(स) , युधिष्ठिर+ राजसूय , अर्हण+ मुपपेद

तमिममहमजं(म्) शरीरभाजां(म्),
हृदि हृदि धिष्ठितमात्मकल्पितानाम्।
प्रतिदृशमिव नैकधार्कमेकं(म्),
समधिगतोऽस्मि विधूतभेदमोह: ॥42॥

धिष्ठित+ मात्म+ कल्पितानाम् ,प्रति+ दृश+ मिव, नैक+ धार्क+ मेकं(म्)

समधि+ गतोऽस्मि, विधूत+ भेदमोह:

सूत उवाच

कृष्ण एवं(म्) भगवति, मनोवाग्दृष्टिवृत्तिभि:।
आत्मन्यात्मानमावेश्य, सोऽन्त:(श्)श्वास उपारमत् ॥43॥

मनोवाग्+ दृष्टि+ वृत्तिभि: , आत्मन्यात् + मान+ मावेश्य

सम्पद्यमानमाज्ञाय, भीष्मं (म्) ब्रह्मणि निष्कले।
सर्वे बभूवुस्ते तूष्णीं(म्), वयां(व्)सीव दिनात्यये ॥44॥

सम्पद्य+ मान+ माज्ञाय , बभू+ वुस्ते

तत्र दुन्दुभयो नेदुर्, देवमानववादिता:।
शशं(व्)सु:(स्) साधवो राज्ञां(ङ्), खात्पेतु:(फ्) पुष्पवृष्टय: ॥45॥

देव+ मानव+ वादिता: , पुष्प+ वृष्टय:

तस्य निर्हरणादीनि, सम्परेतस्य भार्गव।
युधिष्ठिरः(ख्) कारयित्वा, मुहूर्तं(न्) दुःखितोऽभवत् ॥46॥

निर् + हरणा+ दीनि, सम्+ परेतस्य

तुष्टुवुर्मुनयो हृष्टाः (ख्), कृष्णं(न्) तद्गुह्यनामभिः।
ततस्ते कृष्णहृदयाः(स्), स्वाश्रमान् प्रययुः(फ्) पुनः ॥47॥

तुष्टुवुर् + मुनयो, तद् + गुह्य+ नामभिः

ततो युधिष्ठिरो गत्वा, सहकृष्णो गजाह्वयम्।
पितरं(म्) सान्त्वयामास, गान्धारीं(ञ्) च तपस्विनीम् ॥48॥

सान्त्व+ यामास

पित्रा चानुमतो राजा , वासुदेवानुमोदितः।
चकार राज्यं(न्) धर्मेण, पितृपैतामहं(म्) विभुः ॥49॥

वासुदेवा + नुमोदितः, पितृ + पैतामहं(म्)

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
प्रथमस्कंधे युधिष्ठिरराज्यप्रलम्भो नाम नवमोऽध्यायः।।
।।ॐ श्री कृष्णार्पणमस्तु।।

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।